संस्कृत

स्तोत्र

क्र. २२८

६९८/स्तो. १७५

# विश्वेश्वर स्तोत्र

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1) 

श्रीगणेशाय नमः। विश्वानर उवाच। एकं ब्रह्मैवा
द्वितीयं समस्तं सत्यं सत्यं नेह नानास्ति किंचित्॥ एको
रुद्रो न द्वितीयोऽवतस्थे तस्मादेकं त्वां प्रपद्ये महेशं १
एकः कर्ता त्वं हि सर्वस्य शंभो नानारूपोप्येकरूपो
प्यरूपः। यद्वत्प्रत्यग्वर्क एकोप्यनेकस्तस्मान्ना
न्यं त्वां विनेशं प्रपद्ये॥ २॥ रज्जौ सर्पः शुक्तिकायां च
रूप्यं नैरः पूरःस्तन्मृगाख्ये मरीचौ। यद्वत्तद्वद्वि
ष्वगेष प्रपंचो यस्मिन्ज्ञाते तं प्रपद्ये महेशं ३ तो
ये शैत्यं दाहकत्वं च वह्नौ तापो भानौ शीतभानौ
प्रसादः। पुष्पे गंधो दुग्धमध्ये च सर्पिर्यत्तच्छं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(२)

३ भो त्वंततस्त्वां प्रपद्ये। ४।शब्दं गृह्णास्यश्रवास्त्वं हि
जिघ्रेरघ्राणस्त्वं व्यंघ्रिरायासि दूरात्। व्यक्षः पश्य
स्त्वं रसज्ञोप्यजिह्वः कस्त्वां सम्यग्वेत्त्यतस्त्वां प्रप
द्ये ५ नो वेद त्वामीश साक्षाद्धि वेद नो वा विष्णु
र्नो विधाताऽखिलस्य। नो योगींद्रा नेंद्रमुख्या
श्च देवा भक्तो वेद त्वामतस्त्वां प्रपद्ये ६ नो गो ते
त्रं नापि जन्मापि नाख्या नो वा रूपं नैव शीलं न
देशः। इत्थंभूतोपीश्वरस्त्वं त्रिलोक्याः सर्वा
न्कामान्पूरयेस्तद्भजे त्वां ७ त्वत्तः सर्वं त्वं हि
सर्वं स्मरारे त्वं गौरीशस्त्वं च नग्नोऽतिशांतः।। त्वं ३

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2A)

वैवृद्धस्त्वंयुवात्वंचबालस्त्वात्किंयत्तंमास्यतस्त्वां।
नतोस्मि ८ स्तुत्वेतिभूमौनिपपातविप्रःसदं
डवद्यावदतीवहृष्टः॥तावत्सबालोखिलवृद्धवृ
द्धःप्रोवाचभूदेववरंवृणीहि ९ ततउत्थायहृ
ष्टात्मामुनिर्विश्वानरःकृती।प्रत्यब्रवीत्किम
ज्ञातंसर्वज्ञस्यतवप्रभो १० सर्वान्तरात्माभग
वान्सर्वःसर्वप्रदोभवान्॥यांचाचापतितानियुक्ता
मांकिमीशोदैन्यकारिणीं ११ इतिश्रुत्वाथवच
स्तस्यदेवोविश्वानरस्यहृ॥शुचेःशुचिव्रत
स्याथशुचिस्मितोब्रवीच्छुचिः १२ बालउवाच।

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

तथाश्रुच्चेःश्रुचिष्मत्यां यो भिलाषः कृतो हृदि ॥ अ
चिरेणैव कालेन सभ भविष्यत्यसंशयं १३ तव पुत्र
त्वमेष्यामि श्रुचिष्मत्यां महामते ॥ख्यातो गृहप
तिर्नाम्ना श्रुचिः सर्वामरप्रियः १४ अभिलाषा
ष्टकं पुण्यं स्तोत्रमेतन्मयेरितं ॥ अब्दं त्रिकालं
पठनात्कामदं शिवसंनिधौ । १५ एतत्स्तोत्रस्य
पठनं पुत्रपौत्रधनप्रदं ॥ सर्वशांतिकरं वा
पि सर्वापत्परिनाशनं १६ स्वर्गापवर्गसंप
त्तिकारकं नात्र संशयः ॥ प्रातरुत्थाय सुस्ना
तो लिंगमभ्यर्च्य शांभवं १७ वर्षं जपन्निदं स्तो



Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A)

त्रमपुत्रः पुत्रवान्भवेत्॥ वैशाखे कार्तिके माघे वि
शेषनियमैर्युतः १८ यः पठेत्स्नानसमये लभते
सकलं फलं॥ कार्तिकस्य तु मासस्य प्रसादादहम
व्ययः १९ तव पुत्रत्वमेष्यामि यस्त्वन्यस्तत्व
दिष्यति॥ अभिलाषाष्टकमिदं न देयं यस्य कस्य
चित् २० गोपनीयं प्रयत्नेन महावंध्याप्रसू
तिकृत्॥ स्त्रिया वा पुरुषेणापि नियमा
ल्लिंगसन्निधौ २१ अब्दं जप्तमिदं स्तोत्रं
पुत्रदं नात्र संशयः इत्युक्त्वांतर्दधे बालः

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(५)

३ सोपिविप्रोगृहंगतः॥२२॥इतिश्रीस्कंदपुराणे
काशीखंडेवीरेश्वरस्तोत्रं॥ श्री ॥

३

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(5)

॥ ॥अथविश्वेश्वरस्तोत्रंसमाप्तं॥ ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com